# Dugdhapaga Dashakam

## દુગ્ધાપગાદશકમ્

## Document Information

Text title : Dugdhapaga Dashakam

File name : dugdhApagAdashakam.itx

Category : devii, dashaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 28, 2023

*sanskritdocuments.org*

# Dugdhapaga Dashakam

# દુગ્ધાપગાદશકમ્

વીરરાઘવવેદાન્તયતિરાડ્ દેશિકોત્તમઃ ।
સર્વતન્ત્રસ્વતન્ત્રો મે સન્નિધત્તાં સદા હૃદિ ॥

કલશતટિની ભાતિ સ્વચ્છપ્રવાહપરમ્પરા
પૃથુલતરલોદારસ્ફાયત્તરઙ્ગકરમ્બિતા ।
મધુરસલિલાસ્વાદાભ્યાશાભ્યુપાગતસમ્ભૃત-
ત્રિદશમહિષીવક્ષોદેશક્ષરન્નવકુઙ્કુમા ॥ ૧॥

દુગ્ધાપગા દુરિતદૂષિતદુર્જનાનાં દૂરસ્થિતા દુરવગાહામહાહૃદાઢ્યા
દુર્દાન્તદુર્ભરતપોભરિતૈર્મુનીન્દ્રૈઃ સંસેવિતા પ્રવહતિ પ્રથમાનકીર્તિઃ ॥ ૨॥

ચર્કર્તિ સ્વયમધ્વગશ્રમધુતિં બર્ભર્તિ તત્તોષણં
જર્હર્તિ ક્ષણતસ્તદીયદુરિતં વર્ધર્તિ તચ્ચેતસિ ।
પુષ્ણાતિ શ્રિયમદ્ભુતાં ભગવતી મુષ્ણાતિ દોષાનસૌ
કૃષ્ણાસિન્ધુકવેરજાભ્યધિકતાનિષ્ણાતભાવોજ્જ્વલા ॥ ૩॥

સ્વેચ્છોદ્વચ્છદુદુચ્છકચ્છપપરિછેદોગ્ચલત્પઙ્કજ-
પ્રાતઃસ્યન્દિમરન્દવૃન્દલહરીપારમ્પરીમેદુરા ।
એષા દુગ્ધનદી નદીષુ સુભગાશેષાભિવન્ધ્યા જગ-
દ્દોષાપાકરણક્ષમા ક્ષિપતુ મે દોષાનશેષાનસૌ ॥ ૪॥

મધ્યાહ્નાર્કમરીચિમણ્ડલપરિક્લિન્નોઽધ્વગઃ સામ્પ્રતં
દેવિ ત્વત્સલિલાવલોકનકલામાત્રેણ વિશ્રામ્યતિ ।
કિં બ્રૂમો વયમમ્બ દુગ્ધતટિનિ ત્વદ્વૈભવં કે વિદુઃ
પ્રત્યક્ષં વયમન્વભૂમ ભવતિ સ્નાનપ્રભાવં પરમ્ ॥ ૫॥

પ્રત્યક્ષં હ્યુપજીવ્ય શાસ્ત્રમુદિતં પ્રત્યક્ષબાધે તુ નો
શાસ્ત્રં જીવિતુમર્હતીતિ જગદુસ્ત્રય્યન્તસિદ્ધાન્તિનઃ ।
દેવિ ત્વં બહુમન્યસે મતમિદં દુગ્ધસ્રવન્તિ ત્વયિ

સ્નાતૄણાં સ્મૃતિચોદિતં ફલગણં પ્રત્યક્ષયન્તી તતઃ ॥ ૬॥

દેહઃ પ્રત્યક્ષસિદ્ધઃ ખલુ ઘટપટયોરેવમીશેશિતવ્યા-
ઘંશે ભેદઃ પ્રસિદ્ધઃ શ્રુતિભિરપિ કથં સોઽન્યથા કર્તુમર્હઃ ।
કિં મેરુઃ સર્ષપઃ સ્યાત્ કિમિહ પરિબૃઢઃ સ્યાલ્લુલાયઃ કિમશ્વ-
શ્છાગો દુગ્ધાપગે ત્વં કથમિવ સહસે બ્રહ્મજીવૈક્યવાદમ્ ॥ ૭॥

લોલત્કલ્લોલજાલપ્રચલિતકમલોત્ફુલ્લકહ્લારપાલી-
શશ્વન્નિષ્યન્દિમાધ્વીઘુમુઘુમિતપયોભાસમાનાસમાના ।
અશ્રાન્તબ્રહ્મચિન્તાશ્રમવિમલતરસ્વાન્તકાન્તૈર્મુનીન્દ્રૈ-
ર્માતસ્તોષ્ટૂયમાના કિમુ કલશનદિ ત્વં તુ કુલ્હ્યાસકુલ્યા ॥ ૮॥

બ્રહ્માદેશાદિવ ત્વં પ્રવહસિ કલશહ્નાદિનિ બ્રહ્મદેશા-
ભ્યાશે બ્રહ્મપ્રવીણૈરપિ ચ બુધગણૈર્બ્રહ્મચિન્તાધુરીણૈઃ ।
સન્ધ્યાસૂપાસ્યમાનાન્વહમનઘતમસ્વચ્છનીરાવગાહા
ક્રીડાસમ્ભ્રાન્તચેતઃકુવલયનયના મઞ્જુમઞ્જીરઘોષા ॥ ૯॥

ગઙ્ગા તુઙ્ગા તરઙ્ગાવલિભિરધિગતા વારિખેલદ્રથાઙ્ગા-
નઙ્ગાસઙ્ગાવભઙ્ગાવહનિજમહિમા તાં પરાં ગાહતાં વા ।
તાં ગાથાભિઃ સ્તુવન્તઃ કલશનદિ શુભાં ત્વાં પરાં ગાહમાનાઃ
સન્તો ગઙ્ગાધરાઙ્ગાકલનવિરહિતેત્યાદરાન્મુક્તસઙ્ગાઃ ॥ ૧૦॥

વીરરાઘવવેદાન્તવર્યાયાખ્યાનશાલિને ।
સાક્ષાલ્લક્ષ્મીનૃસિંહાય ત્રૈલોક્યગુરવે નમઃ ॥

ઇતિ શ્રીદુગ્ધાપગાદશકં સમ્પૂર્ણમ્ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૯૪)

The Dugdhapagadashaka (94) is a vivid description of and eulogy on the River Palar flowing through North Areot and Chingleput Districts. From the opening verse it may be surmised that the author was Viraraghavavcdantayati, author of the Viraraghavastotra and the Hastigirishastava.

Proofread by Rajesh Thyagarajan

*Dugdhapaga Dashakam*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*